श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्रामायणे वाल्मीकीये

# ॥ श्रीगायत्रीरामायणम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीगायत्रीरामायणम् ॥

तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्॥ १ ॥

स हत्वा राक्षसान् सर्वान् यज्ञघ्नान् रघुनन्दनः।
ऋषिभिः पूजितस्सम्यग्यथेन्द्रो विजयी पुरा॥ २ ॥

विश्वामित्रः स धर्मात्मा श्रुत्वा जनकभाषितम्।
वत्स राम धनुः पश्य इति राघवमब्रवीत्॥ ३ ॥

तुष्टावास्य तदा वंशं प्रविश्य स विशांपतेः।
शयनीयं नरेन्द्रस्य तदासाद्य व्यतिष्ठत॥ ४ ॥

वनवासं हि सङ्ख्याय वासांस्याभरणानि च।
भर्तारमनुगच्छन्त्यै सीतायै श्वशुरो ददौ॥ ५ ॥

राजा सत्यं च धर्मश्च राजा कुलवतां कुलम्।
राजा माता पिता चैव राजा हितकरो नृणाम्॥ ६ ॥

निरीक्ष्य स मुहूर्तं तु ददर्श भरतो गुरुम्।
उटजे राममासीनं जटावल्कलधारिणम्॥ ७ ॥

यदि बुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिम्।
अद्यैव गमने बुद्धिं रोचयस्व महायशः॥ ८ ॥

भरतस्यार्यपुत्रस्य श्वश्रूणां मम च प्रभो।
मृगरूपमिदं व्यक्तं विस्मयं जनयिष्यति॥ ९ ॥

गच्छ शीघ्रमितो राम सुग्रीवं तं महाबलम्।
वयस्यं तं कुरु क्षिप्रं इतो गत्वाऽद्य राघव॥ १० ॥

देशकालौ प्रतीक्षस्व क्षममाणः प्रियाऽप्रिये।
सुखदुःखसहः काले सुग्रीववशगो भव॥ ११ ॥

वन्द्यास्ते तु तपस्सिद्धाः तपसा वीतकल्मषाः।
प्रष्टव्यास्तेऽपि सीतायाः प्रवृत्तिं विनयान्वितैः॥ १२ ॥

स निर्जित्य पुरीं श्रेष्ठां लङ्कां तां कामरूपिणीम्।
विक्रमेण महातेजा हनुमान् मारुतात्मजः॥ १३ ॥

धन्या देवास्स गन्धर्वाः सिद्धाश्च परमर्षयः।
मम पश्यन्ति ये नाथं रामं राजीवलोचनम्॥ १४ ॥

मङ्गळाभिमुखी तस्य सा तदासीन्महाकपेः।
उपतस्थे विशालाक्षी प्रयता हव्यवाहनम्॥ १५ ॥

हितं महार्थं मृदुहेतुसंहितम्
व्यतीत कालायति संप्रतिक्षमम्।
निशम्य तद्वाक्यमुपस्थितज्वरः
प्रसङ्गवान् उत्तरमेततब्रवीत्॥ १६ ॥

धर्मात्मा रक्षसां श्रेष्ठः संप्राप्तोऽयं विभीषणः।
लङ्कैश्वर्यं ध्रुवं श्रीमानयं प्राप्नोत्यकण्टकम्॥ १७ ॥

यो वज्रपाताशनिसन्निपातात्
न चुक्षुभे नापि चचाल राजा।
स रामबाणाभिहतो भृशार्तः
चचाल चापं च मुमोच वीरः॥ १८ ॥

यस्य विक्रममासाद्य राक्षसा निधनं गताः।
तं मन्ये राघवं वीरं नारायणमनामयम्॥ १९ ॥

न ते ददृशिरे रामं दहन्तमरिवाहिनीम्।
मोहिताः परमास्त्रेण गान्धर्वेण महात्मना॥ २० ॥

प्रणम्य देवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली।
बद्धाञ्जलिपुटा चेदमुवाचाऽग्नि समीपतः॥ २१ ॥

चलनात्पर्वतेन्द्रस्य गणा देवाश्च कंपिताः।
चचाल पार्वती चापि तदाश्लिष्टा महेश्वरम्॥ २२ ॥

दाराः पुत्राः पुरं राष्ट्रं भोगाच्छादन भाजनम्।
सर्वमेवाविभक्तं नो भविष्यति हरीश्वरः॥ २३ ॥

यामेव रात्रिं शत्रुघ्नः पर्णशालां समाविशत्।
तामेव रात्रिं सीतापि प्रसूता दारकद्वयम्॥ २४ ॥

इदं रामायणं कृत्स्नं गायत्रीबीजसंयुतम्।
त्रिसन्ध्यं यः पठेन्नित्यं सर्वपापैः प्रमुच्यते॥ २५ ॥

यावदावर्तते चक्रं यावती च वसुन्धरा।
तावत्वर्ष सहस्राणि स्वामित्वं अवधारय॥ २६ ॥

॥ इति श्रीगायत्रीरामायणं संपूर्णम् ॥